निति प्रार्थना



श्री मस्तबब आश्रम

पटोली मंगोत्रियां, जम्मू (तवी)

पिन - 180001

Jyoti Printers, Patoli Jammu–7.

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

ॐ श्री गणेशाय नमः

शुकलाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्
प्रसंन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये
अभिप्रीत्यार्थं सिद्धयर्थं पूजितो यः सुरैरपि
सर्वविघ्नच्छिदे तस्मै श्री गणाधिपतये नमः ॥

विभ्रद्दक्षिण हस्त पद्म युगले दन्ताक्ष सूत्रे शुभे
वामे मोदकपूर्ण पात्र परुषो नागोपवीती त्रिदृक् ।

श्रीमान् सिंहयुगासनः श्रुतियुगे शङ्खौ वहन्मौलिमान्
दिश्यातईश्वरपुत्र ईश भगवांलम्बोदरः शर्म नः ॥

नमो नमो गजेन्द्राय एकदन्त धराय च
नमः ईश्वर पुत्राय श्री गणेशाय नमो नमः ॥

गुरुः ब्रह्मा गुरुः विष्णो गुरुः साक्षात महेश्वरः
गुरुः एव जगत् सर्वम् तस्मै श्रीगुरुवे नमः ॥

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः

आपदामपर्हतारं दातारम सर्वसंपदाम
लोकाभिरामं श्री रामं भूयो भूयो नमाम्यहं ॥

ध्यानमूलं गुरोर्मूर्ति पूजामूलं गुरोपदं
शास्त्रमूलं गुरोवाक्यं मोक्षमूलं गुरोःकृपा ॥

नमामि सद्गुरुं शान्तं प्रत्यक्षं शिवरूपिणं
शिरसा योगपीठस्थं धर्मकार्मार्थ सिद्धये ॥

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

ओम् ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

ओम् शान्ताकारं भुजगशयनं पद्मनाभम् सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यान गम्यम्
वन्दे विष्णुं भवभयहरम् सर्वलोकैकनाथम् ॥

यं ब्रह्मावरुणेन्द्र रुद्रमरुतः स्तुन्वन्ति दिव्यैः स्तवै
र्वेदैः साङ्गपदैक्रमोपनिषदैर्गायन्ति यं सामगा
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरसुरगणाः देवाय तस्मै नमः ॥

ओम् बन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणम्
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निननयनं वन्दे मुकुन्दप्रियम्
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥

शान्तं पद्मासनस्थं शशिधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं
शूलं वज्रं च खड्गं परशुमभयदं दक्षिणाङ्गेवहन्तं ।
नागं पाशं च घन्टां डमरुकसहितं सांकुशं वामभागे
नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥



Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

शिवमहिम्नस्तोत्रम्

पुष्पदन्त उवाच

ॐ महिम्नः पारन्ते परमऽविदुषो यद्यसदृशी-
स्तुतिर्ब्रह्मादीनामपि तदवसन्नास्त्वयि गिरः।
अथाऽवाच्यः सर्वः स्वमतिपरिणामावधि गृणन
ममाप्येष स्तोत्रे हर निरपवादः परिकरः ॥१॥

अतीतः पन्थानं तव च महिमा वाङ्मनसयोर
तद्व्यावृत्या यं चकितमभिधत्ते श्रुतिरपि।
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचः परममृतं निर्मितवत-
स्तव ब्रह्मन्किं वागऽपि सुरगुरोर्विस्मयपदम्।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन! बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्य्यं यत्तज्जगदुदयरक्षाप्रलयकृत्
त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु।
अभव्यानामस्मिन्वरद रमणीयामरमणीम्
विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः ॥४॥

किमीहः किंकायः स खलु किमुपायस्त्रिभुवनम्
किमाधारो धाता सृजति किमुपादानइति च।
अतर्क्यैश्वर्य्ये त्वय्यनवसरदुःस्थो हतधियः
कुतर्कोऽयं कांश्चिन्मुखरयति मोहाय जगताम् ॥५॥

Collection of Late Arjan Singh Handoo, Rainawari. Digitized by eGangotri

अजन्मानो लोकाः किमऽवयववन्तोऽपि जगताम्
अधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद् भुवनजनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर! संशेरत इमे ॥६॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम्
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥

महोक्षः खट्वाङ्गं परशुरजिनं भस्म फणिनः
कपालं चेतीयत्तव वरद! तन्त्रोपकरणम्।
सुरास्तां तामृद्धिं दधति तु भवद्भ्रूप्रणिहितां
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं
परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।
समस्तेऽप्येतस्मिन्पुरमथन! तैर्विस्मित इव
स्तुवञ्जजल्पेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्य्यं यत्नाद् यदुपरि विरञ्चिर्हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्दवपुषः।
ततो भक्तिश्रद्धाभरगुरु गृणद्भ्यां गिरिश! यत्
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥

अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरम्
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान्।
शिरः पद्म-श्रेणी-रचित-चरणाम्भोरुह-बलेः
स्थिरायास्त्वद्भक्ति स्त्रिपुरहर! विस्फूर्जितमिदम् ॥११॥

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

अमुष्य त्वत्सेवासमधिगतसारं भुजवनम्
बलात्कैलासेऽपि त्वदधिवसतौ विक्रमयतः।
अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि
प्रतिष्ठात्वय्यासीद्ध्रुवमुपचितो मुह्यतिखलः॥१२॥

यदृद्धिं सुत्राम्णो वरद! परमोच्चैरपि सती-
मधश्चक्रे बाणः परिजनविधेयत्रिभुवनः।
न तच्चित्रं तस्मिन् वरिवसितरि त्वच्चरणयोर्न
कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥१३॥

अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्याऽसीद्यस्त्रिनयन! विषं संहृतवतः।
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो
विकारोपिश्लाघ्यो भुवनभयभङ्गव्यसनिनः॥१४॥

असिद्धार्था नैव क्वचिदपि सदेवासुरनरे
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।
स पश्यन्नीश त्वामितरसुरसाधारणमभूत
स्मरःस्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥१५॥

मही पादाघाताद व्रजति सहसा संशयपदं
पदं विष्णोर्भ्राम्यदभुजपरिघरुग्णग्रहगणम्।
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥१६॥

वियदव्यापी तारागणगुणितफेनोदगमरुचिः
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते।
जगद्द्वीपाकारं जलधिवलयं तेन कृतमि-
त्यनेनैवोन्नेयं धृतमहिम! दिव्यं तव वपुः॥१७॥

Collection of Late Arjun Nath Handoo, Rainawari. Digitized by eGangotri

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोयं त्रिपुरतृणमाडम्बरविधि
विधेयैः क्रीडन्त्यो न खलुपरतन्त्राः प्रभुधियः ॥१८॥

हरिस्ते साहस्त्रं कमलबलिमाधाय पदयो-
र्यदेकोनें तस्मिन्निजमुदहरन्नेत्रकलम् ।
गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा
त्रयाणांरक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं
श्रुतौ श्रद्धां बद्ध्वा दृढपरिकरः कर्मसुजनः ॥२०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता-
मृषीणामार्त्विज्यं शरणद ! सदस्याः सुरगणाः ।
क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्यसनिनो
ध्रुवंकर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

प्रजानाथं नाथ ! प्रसभमभिकं स्वां दुहितरं
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ।
धनुष्पाणेर्यातं दिवमपि सपत्राकृतममुं
त्रसन्तंतेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥

अपूर्वः कोऽपि ते विवसनतनोस्ते विमृशतां
मुनीनां दाराणां समजनि सकोपव्यतिकरः ।
यतोभग्ने गुह्ये सकृदपि सपर्यां विदधतां
ध्रुवंवमीक्षा श्लीलं किमपि पुरुषार्थप्रसविते ॥२३॥

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

स्वलावण्याशंसा धृतधनुषमन्हाय तृणवत्
पुरः प्लुष्टं दृष्टवा पुरमथन ! पुष्पायुधमपि
यदि स्त्रैणंदेवी यमनिरतदेहार्धघटना-
दवैतित्वामद्धावत वरद ! मुग्धा युवतयः ॥२४॥

श्मशानेष्वाक्रीडा स्मरहर ! पिशाचाःसहचरा-
श्चिताभस्मालेपः स्त्रगपि नृकरोटी परिकरः ।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद ! परमं मङ्गलमसि ॥२५॥

मनः प्रत्यक्चित्ते सविधमविधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः ।
यदालोक्याह्लादं हृद इव निमज्ज्यामृतमये-
दधत्यन्तस्तत्त्वंकिमपि यमिनस्तत्किलभवान् ॥२६॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः
स्त्वमापस्त्वं व्योमत्वमु धरणिरात्मात्वमितिच
परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरम
न विद्मस्तत्तत्त्वंवयमिह तु यत्त्वंनभवसि ॥२७॥

त्रयीं तिस्त्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तंव्यस्तं त्वां शरणद गृणात्योमितिपदम् ॥२८॥

भवःशर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथाभीमेशानाविति यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतिरपि
प्रियास्मैधाम्नेप्रणिहितनमस्योऽस्मिभवते ॥२९॥

Collection of Prof. Satya Vrat Shastri, Retrieved, Digitized by eGangotri

वपुष्प्रादुर्भावादनुमितमिदं जन्मनि पुरा
पुरारे ! नैवाहं क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः सम्प्रत्यतनुरहमग्रेऽप्यनतिमान
महेश ! क्षन्तव्यं तदिदमपराधद्वयमपि ॥३०॥

नमो नेदिष्ठाय प्रियदव ! दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर ! महिष्ठाय च नमः ।
नमो वर्षिष्ठाय त्रिनयन ! यविष्ठाय च नमो
नमः सर्वस्मैते तदिदमिति सर्वाय च नमः ॥३१॥

बहुलरजसे विश्वोत्पत्तौ भवाय नमो नमः
प्रबलतमसे तत्संहारे हराय नमो नमः ।
जनसुखकृते सत्वोद्रिक्तौ मृडाय नमो नमः
प्रमहसि पदे निस्त्रैगुण्येशिवाय नमो नमः ॥३२॥

श्रीपुष्पदन्त मुखपङ्कजनिर्गतेन स्तोत्रेण किल्विषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन समाहितेन सुप्रीणितो भवतिर्महेशः ॥

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः ।
अर्पिता तेन मे देवः प्रीयतां च सदाशिः ॥



Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

भैरव स्तुति

व्याप्तचराचर भावविशेषं
चिन्मयमेकम अनन्तम अनादिम् ।

भैरवनाथम अनाथ शरण्यं
तन्मयचित्ततया हृदि वंदे ।।

त्वन्मयमे तदऽशेषम् इदानीं
भाति मम त्वद् अनुग्रह शक्तया ।

त्वं च महेश ! सदैव ममात्मा
स्वात्म मयं मम तेन समस्तम् ।।

स्वात्मनि विश्गते त्वयि नाथे
तेन न संसृति भीतिः कथाऽतस्ति ।

सत्स्वपि दुर्धर दुःख विमोह
त्रास विधायिषु कर्मगणेषु ।।

अन्तक! मां प्रति मा दृशमेनां
क्रोध करालतमां विदधीहि ।

शंकर सेवन चिन्तन धीरो
भीषण भैरव शक्तिमयोऽस्मि ।।

इत्थमु पोद भवन्मय संविद—
दीधितिदारित भूरितमिस्रः ।

मृत्यु यमान्तक कर्मपिशाचै—
नाऽथ नमोस्तु न जातु बिभेमि ।।

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

प्रोदित सत्य विबोध मरीचि
प्रोक्षित विश्वपदार्थ सतत्त्वः ।

भाव परामृत निर्भर पूर्णे
त्वय्यऽहमात्मनि निर्वृतिमेमि ॥

मानस गोचरमेति यदैव
क्लेशदशाऽतनु तापविधात्री ।

नाथ ! तदैव ममत्वदभेद—
स्तोत्र पराङ्मृतवृष्टिर उदेति ॥

शंकर ! सत्यमिदं व्रतदान—
स्नानतपो भवतापविनाशी ।

तावक शास्त्र परामृतचिन्ता
स्यन्दति चेतसि निर्वृतिधाराः ॥

नृत्यति गायति हृषयति गाढं
संविदियं मम भैरवनाथ ।

त्वां प्रियमाप्य सुदर्शनमेकं
दुर्लभ मन्यजनैः समयज्ञम् ॥

वसुरसपौषै कुष्णदशम्या-
मभिनवगुप्तः स्तवमिमम करोत् ।

येन विभुर्भवमरुसन्तापं
शमयति झटिति जनस्य दयालुः ॥

Collection of Late Arjan Nath Handoo, Srinagar. Digitized by eGangotri

शंकर स्तुति

अतिभीषण कटुभाषण यमकिङ्कर पटली
कृततादन परिपीडन मरणागम समये।
उमया सह मम चेतसि यमशासन निवसन
शिवशंकर शिवजी शंकर हरमे हर दुरितम।

अतिदुर्नय चटुलेन्द्रिय रिपुसंचय दलिते
पविकर्कश कटुजल्पित खलगर्हण चलिते।
शिवया सह मम चेतसि शशिशेखर निवसन
शिवशंकर शिवजी शंकर...।

भवभञ्जन सुररञ्जन खलवञ्चन पुरहन्
दनुजान्तक मदनान्तक रविजान्तक भगवन्।
गिरिजावर करुणाकर परमेश्वर भयहन्
शिवशंकर शिवजी शंकर...।

शक्रशासन कृतशासन चत्रुराश्रम विषयै
कलिविग्रह भवदुर्ग्रह रिपुदुर्बल समये।
द्विज क्षत्रिय वनिता शिशु दरकम्पित हृदये
शिवशंकर शिवजी शंकर...।

भवसम्भव विविधामय परिपीडितवपुषं
दयितात्मज ममताभर कुलषीकृत हृदयम्।
कुरु मां निज चरणार्चिन निरतं भव सततं
शिवशंकर शिवजी शंकर...।



Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम्
सदा वसन्तं हृदयार विन्दे भवं भवानीसहितं नमामि ॥

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं बा मानसं वाऽपराधम् ।

विदितमविदितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्री महादेव शम्भो ॥

नन्दन्तु साधकाः सर्वे विनश्यन्तु विदुषकाः
अवस्था शाम्भवी मेऽस्तु प्रसन्नोस्तु गुरुः सदा ।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामया
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत ।

मन्त्रहीनं क्रियाहीनं विधिहीनं च यग्दृतम्
त्वया तत्क्षम्यतां देव ! कृपया परमेश्वरः ।

राजस्वस्ति प्रजास्वस्ति देशस्वस्ति तथैव च
यजमान गृहे स्वस्ति स्वस्ति गोब्रह्मणेशु च ।

सह नौ अवतु सह नौ भुनक्तु, सहवीर्यं कुर्वावहै
तेजष्विनाम् अधीतमष्तु माद्विषावहै ।

ओम् शान्ति ! शान्ति !! शान्ति !!! ओम्
ओम् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते

पूर्णष्य पूर्णमादाय पूर्णमेवावशिष्यते
ओम शान्तिः ! शान्तिः !! शान्तिः ओम्

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri

Collection of Late Arjan Nath Handoo, Rainawari. Digitized by eGangotri